# नया पाठ्यक्रम

कुल प्रश्नों की संख्या : 27 ] [ कुल मुद्रित पृष्ठों की संख्या : 11

# K-202030–B

## विषय : संस्कृत ( सामान्य )

समय : 3 घण्टे ] [ पूर्णांक : 80

*निर्देशा:* : (*i*) **सर्वा:** प्रश्ना: समाधेया:।

(*ii*) सुन्दरं सुस्पष्टञ्च लिखत।

(*iii*) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि, संस्कृतेनैव लेखनीयानि।

**प्रश्न–1** 'बहुशोनृप:' पदे का सन्धि: वर्तते? [1]

**प्रश्न–2** 'सम् + न्यासी' इत्यस्य सन्धिं कृत्वा लिखत। [1]

**प्रश्न–3** 'धैर्यसागर:' पदे क: समास: अस्ति? [1]

**प्रश्न–4** 'पुत्रवती' इत्यस्य प्रकृतिं प्रत्ययं च पृथक् कुरुत। [½+½=1]

**प्रश्न–5** संस्कृतगद्यकाव्यस्य कति भेदा: सन्ति? [1]

**प्रश्न–6** बौद्धसाहित्यस्य प्रथम: कवि: क: अस्ति? [1]

**प्रश्न–7** शुद्रकेन रचितं नाटकस्य नाम किम् अस्ति? [1]

**प्रश्न–8** 'हल्दीघाटी' अयं पाठ: कस्मात् ग्रन्थात् गृहीत:? [1]

**प्रश्न–9** ''रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्।'' इति वाक्ये रेखाङ्कितपदस्य प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत—

(*क*) लक्ष्मणेन (*ख*) रामेण (*ग*) भरतेन [1]

**प्रश्न-10** 'श्री राधा' कस्यां भाषायां रचिता मूलग्रन्थ: अस्ति? [1]

**प्रश्न-11** अधोलिखितयो: वाक्यद्वयो: रेखाङ्कितपदयो: सन्धि विच्छेदं कृत्वा लिखत— [1+1=2]

(*क*) पिता ह्यात्मनो जरां ज्ञात्वा विचारयामास।

(*ख*) ध्रुवो यस्माच्च विश्लेष:।

**प्रश्न-12** अधोलिखितयो: वाक्यद्वयो: कोष्ठकान्तर्गतपदान् सन्धिं कुरुत— [1+1=2]

(*क*) ............ (यानि + अनवद्यानि) कर्माणि, तानि सेवितव्यानि।

(*ख*) ............ (वायु: + यदा) वहति नन्दनजं मरन्दम्।

**प्रश्न-13** महाकवि भासस्य द्वौ रचनाया: नाम्नि लिखत। [1+1=2]

**प्रश्न-14** पद्यकाव्यस्य परिभाषा स्वभाषया लिखत। [2]

**प्रश्न-15** नाटकस्य का अपि तिस्त्र: विशेषता: स्वभाषया लिखत। [1+1+1=3]

**प्रश्न-16** अधोलिखितेषु वाक्येषु कोष्ठकात् उचितविभक्तिपदं चित्वा रिक्तस्थानानि पूरयत— [1+1+1=3]

(*क*) सिन्धुल: राज्यं ............ अयच्छन्। (मुञ्जाय / मुञ्जम्)

(*ख*) कैकेय्या: भर्ता ............ समम् आसीत्। (शक्रस्य / शक्रेण)

(*ग*) अपि च ............ प्रति पूर्वाभिमुखा पृथिवी। (सूर्यम् / सूर्यस्य)

**प्रश्न-17** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहा: कुरुत (केषाञ्जित् ***चतुर्णाम्***)— [1×4=4]

(*i*) भार्गवस्य आश्रमपदं ददर्श।

(*ii*) तस्या येन अकार्यम् करिष्यति।

(*iii*) यथा सा निर्जीवम् वस्तु आसीत्।

(*iv*) सरलतया प्रकृत्या प्रणीतं पञ्चोपचारं पूजनमस्ति।

(*v*) त्वम् यथायोग्य पदे नियुक्तोऽसि।

(*vi*) नरकस्य द्वारं त्रिविधम् अस्ति।

(*vii*) तस्थौ सादित्य इव मन्दर:।

**प्रश्न-18** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत् (केषाञ्चित् ***चतुर्णाम्***)— [1×4=4]

पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजा: पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्र: समजनि। स: यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास-यद्यहं

राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभात् विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्वा तदुत्सङ्गे भोजमात्मानं मुमोच।

*प्रश्ना:*

(*i*) पुरा धाराराज्ये किं नाम राजा आसीत्?

(*ii*) राजा आत्मनः जरां ज्ञात्वा किं विचारयामास?

(*iii*) 'महाबलं मुञ्जम्' अनयोः पदयोः विशेषण पदं किम्?

(*iv*) 'पर्यपालयत्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(*v*) 'सुताय' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

***अथवा***

तत्र वर्णानां स्थान-करण-प्रयत्नादिभिः निष्पत्तिनिर्णयिनी शिक्षा। नानाशाखाधीतानां मन्त्राणां विनियोजकं सूत्रं कल्पः। सा च यजुर्विद्या। शब्दानामन्वाख्यानं व्याकरणम्। निर्वचनं निरूक्तम्। छन्दसां प्रतिपादयित्री छन्दोविचितिः। ग्रहगणितं ज्योतिषम्। पौरूषेयं तु पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतितन्त्रम् इति चत्वारि शास्त्राणि। तत्र वेदाख्यानोपनिबन्धन प्रायं पुराणमष्टादशधा।

*प्रश्ना:* (केषाञ्चित् ***चतुर्णाम्***)

(*i*) व्याकरणं किं वर्णितम्?

(*ii*) कानि चत्वारि शास्त्राणि सन्ति?

(*iii*) 'निर्वचनं निरूक्तम्' अनयोः पदयोः विशेषणपदं किम्?

(*iv*) 'अक्षराणाम्' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(*v*) केषां विनियोजकं सूत्रं कल्पः?

**प्रश्न-19** अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत् (केषाञ्चित् ***चतुर्णाम्***)— [1×4=4]

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥

*प्रश्ना:*

(*i*) राजा दिलीपः कासां भूत्यर्थं बलिम् अग्रहीत्?

(*ii*) रविः किमर्थं रसम् आदत्ते?

(*iii*) 'रविः' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम्?

(*iv*) 'जलम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(*v*) 'प्रजानामेव भूत्यर्थं स ....।' अत्र 'स' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

*अथवा*

प्रतीक्षेऽहं तव कृते दिनं दिनम्।
रजनीं रजनीं च
न जातु दर्शनं ददासि मे,
किं तावन्मे सा प्रतीक्षा ?
तस्यां मे चांचल्य परिपूरितायां प्रतीक्षायाम्
कुत्र वा विद्यते स्थानम्
अवस्थानाय तव पूर्णतया ?

*प्रश्नाः* (केषाञ्चित् ***चतुर्णाम्***)

(*i*) मे किं न ददासि त्वम् ?

(*ii*) तव कृते अहं कदा प्रतीक्षे ?

(*iii*) 'सा प्रतीक्षा' अनयोः पदयोः विशेष्यपदं किम् ?

(*iv*) 'अहम्' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(*v*) 'मम' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**प्रश्न-20** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत् (केषाञ्चित् ***चतुर्णाम्***)— [1×4=4]

संन्यासी—कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

दौवारिकः—भगवन्! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लंघ्य निजपरिचयमददेवाऽऽयातीत्याक्रुश्यते।

संन्यासी—सत्यं क्षान्तोऽयमपराधः, परं संन्यासिनो ब्रह्मचारिणः पण्डिताः, स्त्रियो बालाश्च न किमपि प्रष्टव्याः। आत्मानम् अपरिचाययन्तोऽपि प्रवेष्टव्याः।

दौवारिकः—संन्यासिन्! संन्यासिन्! बहूक्तम्, विरम न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे, केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः। प्राहणे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ।

*प्रश्ना:*

(*i*) के किमपि न प्रष्टव्या: ?

(*ii*) वयं केवलं कस्याज्ञां शिरसा वहाम: ?

(*iii*) 'अयम् अपराध:' अनयो: पदयो: विशेषणपदं किम् ?

(*iv*) 'प्रतीक्षामहे' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(*v*) 'मूर्खा:' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

***अथवा***

कुण्डला—सखि मदालसे ! त्वं तु केवलं विद्याध्ययने एव रता क्रियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि ?

मदालसा—ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपय विन्दव एव प्राप्ता अद्यावधि।

कुण्डला—विनयशीले! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरुतुम्बरूमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

मदालसा—किं श्रुतं त्वया यद् गुरुवर्यै: माम् अधिकृत्य पित्रे कथितम् ?

कुण्डला—अथ किम्। राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वर: न प्राप्त: अत: तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

*प्रश्ना:* (केषाञ्चित् ***चतुर्णाम्***)

(*i*) अन्वेषणं कार्यम् इति केषां मतम् आसीत् ?

(*ii*) राजकुमारी मदालसा कीदृशी जाता ?

(*iii*) 'विद्या' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(*iv*) 'सर्वा विद्या' अनयो: पदयो: विशेषणपदं किम् ?

(*v*) 'अविनयम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**प्रश्न–21** अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये मञ्जूषाप्रदत्तपदै: रिक्तस्थानपूर्तिं कृत्वा अन्वयं च पुन: लिखत— [2½×2½=5]

(*अ*) ततो मुहूर्तोभ्युदिते जगच्चक्षुषि भास्करे।

भार्गवस्याश्रमपदं स ददर्श नृणां वर: ॥

अन्वय:—तत: (*i*) ......... वर: (*ii*) .......... चक्षुषि (*iii*) .........

मुहूर्ताभ्युदिते स: (*iv*) ......... आश्रमपदं (*v*) ..........।

( ब) सुप्तविश्वस्तहरिणं स्वस्थस्थितविहङ्गमम्।

विश्रान्त इव यद्दृष्ट्वा कृतार्थ इव चाऽभवत्॥

अन्वय:—सुप्तविश्वस्त (*i*) ........ स्वस्थस्थित (*ii*) ......... विश्रान्त:

(*iii*) ......... यत् (*iv*) .......... कृतार्थ: इव च (*v*) .......... ।

| मञ्जूषा | अभवत्, दृष्ट्वा, विहङ्गमम्, हरिणम, नृणाम्, भास्करे, भार्गवस्य, ददर्श, जगत्, इव। |
|---|---|

***अथवा***

स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत यो अस्मिन् प्रश्न पत्रे न समागता: ।

**प्रश्न–22** अधोलिखितानां प्रश्नानां उत्तराणि संस्कृतभाषायां लिख्यताम् (केषाञ्चित् ***पञ्चानाम्***)— [1×5=5]

(*i*) सत्यात् किं न कर्तव्यम्?

(*ii*) अश्वपृष्ठात् क: अवातरत्?

(*iii*) स्वजन: कुत्र प्रहरति?

(*iv*) दौवारिकस्य निष्ठा केन परीक्षिता?

(*v*) केषां समाजे अपण्डितानां मौनं विभूषणम्?

(*vi*) प्रतापनृपते: अस्त्रधारा कतिधा अभवत्?

(*vii*) मनुष्य: किम् त्यजेत्?

(*viii*) अपौरुषेयं किम् अस्ति?

**प्रश्न–23** अधोलिखितानां वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत (केषाञ्चित् ***पञ्चानाम्***)— [1×5=5]

(*i*) कोलाहल मत करो।

(*ii*) वृक्ष से पत्ते गिरते हैं।

(*iii*) गङ्गा हिमालय से निकलती है।

(*iv*) हमारे शरीर में अनेक अङ्ग हैं।

(*v*) कवियों में कालिदास श्रेष्ठ हैं।

(*vi*) राजा याचक को दान देता है।

(*vii*) श्री गणेश को नमस्कार है।

(*viii*) पुत्र पिता के साथ बाजार जाता है।

**प्रश्न-24** भवान् विभवः। भवन्मित्रं वेदान्तः स्वनगरमण्डले चित्रकलाप्रतियोगितायां प्रथमं पुरस्कारं लब्धवान्। तम् वर्धापयितुं लिखिते पत्रे मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत— [½×10=5]

भिलाईनगरम्

प्रिय सखे (*i*) ..........

सप्रेम नमः

भवान् अस्मिन् वर्षे (*ii*) .......... चित्रकलाप्रतियोगितायां (*iii*) .......... मण्डलानि पराजित्य प्रथमं पुरस्कारं (*iv*) ..........। एतदर्थं मनसि अहं (*v*) .......... हर्षमनुभवामि। भवान् प्रायशः विचारमग्नो (*vi*) ..........। अत एव तव चित्रे ते भावाः समागताः यान् (*vii*) .......... निर्णायकाः तुभ्यं प्रथमं स्थानं दत्तवन्तः। एतस्मिन् विषये तव (*viii*) .......... अभिवादनार्थौ उत्साहं वर्धयितुं सदैव संलग्नौ। (*ix*) .......... तौ प्रति निवेदय अभिवादनम्। आशासे यद् भवान् अग्रिमवर्षे स्वदेशे प्रतियोगितासु प्रथममेव स्थानं लप्स्यते। तव भगिन्यै शुभाशिषः।

भवताम् (*x*) .......... सखा

विभवः

मञ्जूषा –

| |
|---|
| मम, स्वनगरमण्डलेषु, महान्तम्, सर्वाणि, लब्धवान्, भवति, पितरौ, दृष्ट्वा, वेदान्त!, अभिन्नः |

***अथवा***

मञ्जूषायां प्रदत्तशब्दैः प्राचार्यं प्रति अवकाशं ग्रहीतुं लिखिते प्रार्थना पत्रे रिक्तस्थानानि पूरयत—

सेवायाम्

श्रीमन्तः ........... (*i*)

शा. उ. मा. विद्यालयः अभनपुरम्।

विषयः ........... (*ii*) प्रार्थनापत्रम्।

........... (*iii*)

........... (*iv*) निवेद्यते यत् मम भगिन्याः ........... (*v*) मार्चमासस्य अष्टाविंशत्यां ........... (*vi*) भविष्यति। मया च तत्र विवाहात् ........... (*vii*) अवश्यं

गन्तव्यम्। अतः कृपया 27.03.2020 दिनाङ्कात् 28.03.2020 दिनाङ्कपर्यन्तम् ........... (*viii*) दिवसयोः अवकाशं ........... (*ix*) माम् अनुग्रहणन्तु भवन्तः।

सधन्यवादम्,

........... (*x*) शिष्यः

मुकेशः

कक्षा–द्वादश

मञ्जूषा –

| |
|---|
| भवतः, अवकाशाय, महोदयः, प्रदाय, द्वयोः, सादरम्, तारिकायाम्, विवाहः, दिन-द्वयपूर्वम्, प्राचार्यः |

**प्रश्न–25** अधः प्रदत्तायां लघुकथायां मञ्जूषापदसहायतया रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत— [½×10=5]

एकदा एकः कलाकारः स्वचित्राणां (*i*) ......... अकरोत्। ता द्रष्टुं नगरस्य (*ii*) ......... जनाः समागच्छन्। सर्वे मानवाः तां प्रदर्शनीं दृष्टवन्तः। तत्र (*iii*) ......... एका बाला। सा (*iv*) ......... अन्ते एकं चित्रं दृष्टवती यत्र मुखं तु केशाच्छन्नम् पादयोः च आस्ताम् (*v*) .........। मूले च लिखितम् 'अवसरः'। सकलाः जनाः तु न अजानन् किमपि। बाला तु तं चित्रकारं तद् विषये (*vi*) .........। कलाकारः अवदत् एषोऽवसरोऽस्ति। बाला आच्छन्नस्य मुखस्य विषये यदा अपृच्छत् तदा सोऽवदत्-सर्वेषां जीवने अवसरः (*vii*) ......... आगच्छति परं सामान्याः जनाः तं न (*viii*) ......... प्रगतिं च न कुर्वन्ति। बाला पुनः तत्पादयोः पक्षविषयेऽपि पृष्टवती—'कथमेतौ पक्षौ पादयोः?' कलाकारः अवदत् 'अवसरः' पक्षौ प्रक्षिप्य यदा गच्छति तदा न प्रत्यावर्तते। बाला चित्रस्य रहस्यं (*ix*) ......... तस्मादेव (*x*) ......... प्रगतेः अवसरं प्रतीक्षितुं प्रारभत।

मञ्जूषा –

| |
|---|
| दिनात्, अपृच्छत्, प्रदर्शनीम्, चित्रस्य, शतशः, पक्षौ, परिचिन्वन्ति, ज्ञात्वा, आगता, प्रदर्शनीवत्। |

***अथवा***

कश्चित् श्रेष्ठिपुत्रः पितुः मृत्योः अनन्तरं तस्य धनस्य स्वामी भूत्वा धनस्य (*i*) ......... अकरोत्। ईदृशं किमपि पापं नासीत् यत् तेन न (*ii*) .........। ईदृशं मादक द्रव्यं नासीत् यत् तेन न सेवितम्। एकदा एकः महात्मा तम् अवदत्—प्रिय (*iii*) ......... लक्ष्मीः तु चञ्चला भवति अतः प्रथमम् आयसाधनाय प्रयत्नं कुरु अपि च धनस्य (*iv*) ......... कुरु, दीनानां सहायतां कुरु इति। कुपितः श्रेष्ठिपुत्रः अवदत्—(*v*) ......... किं भविष्यति इति विचार्य अद्यतनीयं सुखं न त्यजामि इति। महात्मा उक्तवान्—

'प्रिय मित्र! एवम् (*vi*) ......... भवतां स्वास्थ्यधनम् अपि नष्टं भविष्यति इति। सः श्रेष्ठिपुत्रः न अमन्यत। (*vii*) ......... सः मार्गेषु (*viii*) ......... याचते स्म। तस्य शरीरे (*ix*)......... जाताः। तेभ्यः रुधिरं स्रवति स्म। महात्मा अतीव दुःखी अभवत्। तेन उक्तम्-नूनं (*x*) ......... विपन्मूलम्।

मञ्जूषा –

| |
|---|
| सदुपयोगं, व्रणाः, रोटिकाखण्डान्, श्वः, अपव्ययं, दुर्व्यसनैः, कालान्तरे, बन्धो, असंयमः, आचरितम्। |

**प्रश्न-26** अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति-प्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत (केषाञ्चित् ***पञ्चानाम्***)— [1×5=5]

(*i*) आचार्याय प्रियं धनम् ............. (आ + हृ + ल्यप्) प्रजातन्तुं मा व्यवच्छेत्सीः।

(*ii*) तस्याः वचनात् भवदभिषेको ............. (नि + वृत् + क्त)।

(*iii*) युधिष्ठिरः द्रौपदीं सम्पत्तिं ............. (मन् + शानच्) द्यूते हारितवान्।

(*iv*) ............. (विद्या + मतुप्) वस्तुतः एव रूपम्।

(*v*) ज्योत्स्ना तमः ............. (सहचर + ङीप्) चपलेति चित्रम्।

(*vi*) ............. (पुराण + ठक्) परम्परायां चत्वारः युगाः मताः।

(*vii*) भर्त्रा सदैव भार्या भर्तव्या ............. (रक्ष् + तव्यत् + टाप्) च।

(*viii*) नैकेनापि समं गता ............. (वसुमत् + ङीप्) नूनं त्वया यास्यति।

**प्रश्न-27** अधोलिखितम् अपठितगद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत— [1×10=10]

एकदा प्रतापसिंहः नाम नृपः स्व-मन्त्रिणम् अपृच्छत् यत्—"कः श्रेष्ठः नरः ?" इति। मन्त्री प्रत्यवदत्—हे राजन्! यः मानवः स्वोद्देश्यं निश्चीय अनवरतं परिश्रमं करोति, सः श्रेष्ठः भवति।" तदा राज्ञा मन्त्रिणः वचनानां सत्यतां परीक्षितुम् एका घोषणा कारिता यत्—"यः कोऽपि मानवः पूर्णिमायाः रात्रौ द्वादशवादने मम पार्श्वे भवनस्योपरि आगमिष्यति, अहं तस्मै सहस्त्रशतं स्वर्णमुद्राः प्रदास्यामि।" अस्याः घोषणायाः पश्चात् अनेके युवकाः समागवन्तः, परन्तु राज्ञा कृतायाः स्वादिष्ट व्यञ्जनानां, मनोरञ्जनसाधनानां निःशुल्क व्यवस्थायाः प्रलोभने निमग्नाः अभवन्। परं सिद्धकुमारः नामकः एकः युवकः प्रलोभान् परित्यज्य स्वोद्देश्यं स्मरन् राजानम् उपागच्छत्। प्रसन्नः भूत्वा राज्ञा सः (युवकः सिद्धकुमारः) पुरस्कृतः अपि च तस्मै उच्चपदं दत्तम्। अतएव वस्तुतः "उद्देश्यः हि प्रमुखः।"

*प्रश्ना:*

(*i*) नृपस्य किं नाम आसीत्?

(*ii*) राजा कम् अपृच्छत्?

(*iii*) नृप: का: प्रदास्यति?

(*iv*) युवका: कुत्र निमग्ना: अभवन्?

(*v*) राज्ञा का घोषणा कारिता?

(*vi*) सिद्धकुमार: किं कुर्वन् कम् उपागच्छत्?

(*vii*) 'य: मानव:' अनयो: पदयो: विशेषणपदं किम्?

(*viii*) 'प्रदास्यामि' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(*ix*) 'रूप्यकाणि' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(*x*) 'प्रसन्न: भूत्वा राज्ञा स: पुर....।' अत्र 'स:' इति सर्वनामपदं कस्मै प्रयुक्तम्?

***अथवा***

अहमेक: छिन्न: द्रुम: अस्मि। ह्य: वने एक: मानव: आगच्छत्। स: काष्ठाय मम शरीरम् अछिन्नत्। छेदनेन मे शरीरे अनेके व्रणा: जाता:। छुरिकाया: प्रहारेण शरीरात् अश्रुरूपा: जलबिन्दव: अपतन्। अकथनीया मम पीड़ा। हृदयं विदीर्णं जातम्। अश्रुभि: कण्ठ: अवरुद्ध:। मम अन्तकाल: समीपे एव तिष्ठति। काष्ठानि एकत्रीकृत्य स: तु अगच्छत्। परं कोऽस्ति अत्र व्यथाकथाश्रवणाय। वृक्षान् छित्त्वा मानव: प्रकृतिमातु: अङ्गानि नाशयति। ईंधनाय, कर्गदपत्राय, भवननिर्माणाय च मम काष्ठस्य प्रयोग: भवति। किन्तु कुत: मे पुष्पाणि पत्राणि कुत: च रोगनिवारणाय औषधय:? निराश्रिता: भविष्यन्ति आश्रिता: खगा: कीटपतङ्गाश्च? पन्थान: अपि छायाहीना: भविष्यन्ति। आतपेन तप्त: श्रान्त: पथिक: अधुना कुत्र गमिष्यति? मम जीवने पुन: वसन्तर्तु: न आगमिष्यति।

*प्रश्ना:*

(*i*) छुरिकाप्रहारेण वृक्षस्य शरीरात् के अपतन्?

(*ii*) छेदनेन वृक्षस्य शरीरे के जाता:?

(*iii*) केन तप्त: श्रान्त: पथिक: कुत्र गमिष्यति?

(*iv*) मानव: कस्या: अङ्गानि नाशयति?

(*v*) वृक्षस्य काष्ठप्रयोग: कुत्र-कुत्र भवति?

(*vi*) खगा: कीटपतङ्गाश्च कीदृशा: भविष्यन्ति ?

(*vii*) 'श्रान्त: पथिक:' अनयो: पदयो: विशेष्यपदं किम् ?

(*viii*) 'आश्रिता:' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(*ix*) 'जनन्या:' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(*x*) 'वसन्तर्तु:' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

———